# guru gItA - long version

# ગુરુ ગીતા

## Document Information

Text title : Gurugita

File name : gurugita.itx

Category : gItA, giitaa, gurudev

Location : doc_giitaa

Author : Vyasa (by tradition) author of Puranas

Transliterated by : Sunder Hattangadi and Shankarans achintya at ican.net

Proofread by : Sunder Hattangadi, Jan Mares Jan.Mares@bbt.se

Latest update : July 5, 2024

Send corrections to : Sunder Hattangadi

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 29, 2024

*sanskritdocuments.org*

# ગુરુ ગીતા

## ॥ પ્રથમોऽધ્યાયઃ ॥

અચિન્ત્યાવ્યક્તરૂપાય નિર્ગુણાય ગુણાત્મને ।
સમસ્તજગદાધારમૂર્તયે બ્રહ્મણે નમઃ ॥ ૧॥

ઋષય ઊચુઃ ।
સૂત સૂત મહાપ્રાજ્ઞ નિગમાગમપારગ ।
ગુરુસ્વરૂપમસ્માકં બ્રૂહિ સર્વમલાપહમ્ ॥ ૨॥

યસ્ય શ્રવણમાત્રેણ દેહી દુઃખાદ્વિમુચ્યતે ।
યેન માર્ગેણ મુનયઃ સર્વજ્ઞત્વં પ્રપેદિરે ॥ ૩॥

યત્પ્રાપ્ય ન પુનર્યાતિ નરઃ સંસારબન્ધનમ્ ।
તથાવિધં પરં તત્ત્વં વક્તવ્યમધુના ત્વયા ॥ ૪॥

ગુહ્યાદ્ગુહ્યતમં સારં ગુરુગીતા વિશેષતઃ ।
ત્વત્પ્રસાદાચ્ચ શ્રોતવ્યા તત્સર્વં બ્રૂહિ સૂત નઃ ॥ ૫॥

ઇતિ સમ્પ્રાર્થિતઃ સૂતો મુનિસઙ્ઘૈર્મુહુર્મુહુઃ ॥

કુતૂહલેન મહતા પ્રોવાચ મધુરં વચઃ ॥ ૬॥

સૂત ઉવાચ ।
શ્રુણુધ્વં મુનયઃ સર્વે શ્રદ્ધયા પરયા મુદા ।
વદામિ ભવરોગઘ્નીં ગીતામાતૃસ્વરૂપિણીમ્ ॥ ૭॥

પુરા કૈલાસશિખરે સિદ્ધગન્ધર્વસેવિતે ।
તત્ર કલ્પલતાપુષ્પમન્દિરેऽત્યન્તસુન્દરે ॥ ૮॥

વ્યાઘ્રાજિને સમાસીનં શુકાદિમુનિવન્દિતમ્ ।
બોધયન્તં પરં તત્ત્વં મધ્યે મુનિગણં ક્વચિત્ ॥ ૯॥

પ્રણમ્રવદના શશ્વન્નમસ્કુર્વન્તમાદરાત્ ।

દૃષ્ટ્વા વિસ્મયમાપન્ના પાર્વતી પરિપૃચ્છતિ ॥ ૧૦॥

પાર્વત્યુવાચ ।
ૐ નમો દેવ દેવેશ પરાત્પર જગદ્ગુરો ।
ત્વાં નમસ્કુર્વતે ભક્ત્યા સુરાસુરનરાઃ સદા ॥ ૧૧॥

વિધિવિષ્ણુમહેન્દ્રાદ્યૈર્વન્દ્યઃ ખલુ સદા ભવાન્ ।
નમસ્કરોષિ કસ્મૈ ત્વં નમસ્કારાશ્રયઃ કિલઃ ॥ ૧૨॥

દૃષ્ટ્વૈતત્કર્મ વિપુલમાશ્ચર્ય પ્રતિભાતિ મે ।
કિમેતન્ન વિજાનેઽહં કૃપયા વદ મે પ્રભો ॥ ૧૩॥

ભગવન્ સર્વધર્મજ્ઞ વ્રતાનાં વ્રતનાયકમ્ ।
બ્રૂહિ મે કૃપયા શમ્ભો ગુરુમાહાત્મ્યમુત્તમમ્ ॥ ૧૪॥

કેન માર્ગેણ ભો સ્વામિન્ દેહી બ્રહ્મમયો ભવેત્ ।
તત્કૃપાં કુરુ મે સ્વામિન્નમામિ ચરણૌ તવ ॥ ૧૫॥

ઇતિ સમ્પ્રાર્થિતઃ શશ્વન્મહાદેવો મહેશ્વરઃ ।
આનન્દભરિતઃ સ્વાન્તે પાર્વતીમિદમબ્રવીત્ ॥ ૧૬॥

શ્રી મહાદેવ ઉવાચ ।
ન વક્તવ્યમિદં દેવિ રહસ્યાતિરહસ્યકમ્ ।
ન કસ્યાપિ પુરા પ્રોક્તં ત્વદ્ભક્ત્યર્થં વદામિ તત્ ॥ ૧૭॥

મમ રૂપાસિ દેવિ ત્વમતસ્તત્કથયામિ તે ।
લોકોપકારકઃ પ્રશ્નો ન કેનાપિ કૃતઃ પુરા ॥ ૧૮॥

યસ્ય દેવે પરા ભક્તિર્યથા દેવે તથા ગુરૌ ।
તસ્યૈતે કથિતા હ્યર્થાઃ પ્રકાશન્તે મહાત્મનઃ ॥ ૧૯॥

યો ગુરુ સ શિવઃ પ્રોક્તો યઃ શિવઃ સ ગુરુ સ્મૃતઃ ।
વિકલ્પં યસ્તુ કુર્વીત સ નરો ગુરુતલ્પગઃ ॥ ૨૦॥

દુર્લભં ત્રિષુ લોકેષુ તચ્છૃણુશ્વ વદામ્યહમ્ ।
ગુરુબ્રહ્મ વિના નાન્યઃ સત્યં સત્યં વરાનને ॥ ૨૧॥

વેદશાસ્ત્રપુરાણાનિ ચેતિહાસાદિકાનિ ચ ।
મન્ત્રયન્ત્રાદિવિદ્યાનાં મોહનોચ્ચાટનાદિકમ્ ॥ ૨૨॥

શૈવશાક્તાગમાદીનિ હ્યન્યે ચ બહવો મતાઃ ।

અપભ્રંશાઃ સમસ્તાનાં જીવાનાં ભ્રાન્તચેતસામ્ ॥ ૨૩ ॥

જપસ્તપો વ્રતં તીર્થં યજ્ઞો દાનં તથૈવ ચ ।
ગુરુતત્ત્વમવિજ્ઞાય સર્વં વ્યર્થં ભવેત્પ્રિયે ॥ ૨૪ ॥

ગુરુબુદ્ધ્યાત્મનો નાન્યત્ સત્યં સત્યં વરાનને ।
તલ્લાભાર્થં પ્રયત્નસ્તુ કર્તવ્યશ્ચ મનીષિભિઃ ॥ ૨૫ ॥

ગૂઢાવિદ્યા જગન્માયા દેહશ્ચાજ્ઞાનસમ્ભવઃ ।
વિજ્ઞાનં યત્પ્રસાદેન ગુરુશબ્દેન કથયતે ॥ ૨૬ ॥

યદઙ્ઘ્રિકમલદ્વન્દ્વં દ્વન્દ્વતાપનિવારકમ્ ।
તારકં ભવસિન્ધોશ્ચ તં ગુરું પ્રણમામ્યહમ્ ॥ ૨૭ ॥

દેહી બ્રહ્મ ભવેદ્યસ્માત્ ત્વત્કૃપાર્થં વદામિ તત્ ।
સર્વપાપવિશુદ્ધાત્મા શ્રીગુરોઃ પાદસેવનાત્ ॥ ૨૮ ॥

સર્વતીર્થાવગાહસ્ય સમ્પ્રાપ્નોતિ ફલં નરઃ ।
ગુરોઃ પાદોદકં પીત્વા શેષં શિરસિ ધારયન્ ॥ ૨૯ ॥

શોષણં પાપપઙ્કસ્ય દીપનં જ્ઞાનતેજસઃ ।
ગુરોઃ પાદોદકં સમ્યક્ સંસારાર્ણવતારકમ્ ॥ ૩૦ ॥

અજ્ઞાનમૂલહરણં જન્મકર્મનિવારકમ્ ।
જ્ઞાનવિજ્ઞાનસિદ્ધ્યર્થં ગુરુપાદોદકં પિબેત્ ॥ ૩૧ ॥ (જ્ઞાનવૈરાગ્ય)

ગુરુપાદોદકં પાનં ગુરોરુચ્છિષ્ટભોજનમ્ ।
ગુરુર્મૂર્તેઃ સદા ધ્યાનં ગુરોર્નામ્નઃ સદા જપઃ ॥ ૩૨ ॥

સ્વદેશિકસ્યૈવ ચ નામકીર્તનં
ભવેદનન્તસ્ય શિવસ્ય કીર્તનમ્ ।
સ્વદેશિકસ્યૈવ ચ નામચિન્તનં
ભવેદનન્તસ્ય શિવસ્ય ચિન્તનમ્ ॥ ૩૩ ॥

યત્પાદરેણુર્વૈ નિત્યં કોઽપિ સંસારવારિધૌ ।
સેતુબન્ધાયતે નાથં દેશિકં તમુપાસ્મહે ॥ ૩૪ ॥

યદનુગ્રહમાત્રેણ શોકમોહૌ વિનશ્યતઃ ।
તસ્મૈ શ્રીદેશિકેન્દ્રાય નમોઽસ્તુ પરમાત્મને ॥ ૩૫ ॥

યસ્માદનુગ્રહં લબ્ધ્વા મહદજ્ઞાનમુત્સૃજેત્ ।

તસ્મૈ શ્રીદેશિકેન્દ્રાય નમશ્ચાભીષ્ટસિદ્ધયે ॥ ૩૬॥

કાશીક્ષેત્રં નિવાસશ્ચ જાહ્નવી ચરણોદકમ્ ।
ગુરુવિશ્વેશ્વરઃ સાક્ષાત્ તારકં બ્રહ્મનિશ્ચયઃ ॥ ૩૭॥

ગુરુસેવા ગયા પ્રોક્તા દેહઃ સ્યાદક્ષયો વટઃ ।
તત્પાદં વિષ્ણુપાદં સ્યાત્ તત્ર દત્તમનન્તકમ્ ॥ ૩૮॥ (દત્ત મનસ્ તતમ્)

ગુરુમૂર્તિં સ્મરેન્નિત્યં ગુરુર્નામ સદા જપેત્ ।
ગુરોરાજ્ઞાં પ્રકુર્વીત ગુરોરન્યં ન ભાવયેત્ ॥ ૩૯॥

ગુરુવક્ત્રે સ્થિતં બ્રહ્મ પ્રાપ્યતે તત્પ્રસાદતઃ ।
ગુરોર્ધ્યાનં સદા કુર્યાત્ કુલસ્ત્રી સ્વપતિં યથા ॥ ૪૦॥ (પુરુષં સ્વૈરિણી યથા)

સ્વાશ્રમં ચ સ્વજાતિં ચ સ્વકીર્તિં પુષ્ટિવર્ધનમ્ ।
એતત્સર્વં પરિત્યજ્ય ગુરુમેવ સમાશ્રયેત્ ॥ ૪૧॥

અનન્યાશ્ચિન્તયન્તો યે સુલભં પરમં સુખમ્ ।
તસ્માત્સર્વપ્રયત્નેન ગુરોરારાધનં કુરુ ॥ ૪૨॥

ગુરુવક્ત્રે સ્થિતા વિદ્યા ગુરુભક્ત્યા ચ લભ્યતે ।
ત્રૈલોક્યે સ્ફુટવક્તારો દેવર્ષિપિતૃમાનવાઃ ॥ ૪૩॥

ગુકારશ્ચાન્ધકારો હિ રુકારસ્તેજ ઉચ્યતે ।
અજ્ઞાનગ્રાસકં બ્રહ્મ ગુરુરેવ ન સંશયઃ ॥ ૪૪॥

ગુકારો ભવરોગઃ સ્યાત્ રુકારસ્તન્નિરોધકૃત્ । (ગુકારો ચાન્ધકારસ્તુ)
ભવરોગહરત્યાચ્ચ ગુરુરિત્યભિધીયતે ॥ ૪૫॥ (અન્ધકારા વિનાશિત્વાત્ ગુરુરિત્યભિધીયતે)

ગુકારશ્ચ ગુણાતીતો રૂપાતીતો રુકારકઃ ।
ગુણરૂપવિહીનત્વાત્ ગુરુરિત્યભિધીયતે ॥ ૪૬॥

ગુકારઃ પ્રથમો વર્ણો માયાદિગુણભાસકઃ ।
રુકારોઽસ્તિ પરં બ્રહ્મ માયાભ્રાન્તિવિમોચનમ્ ॥ ૪૭॥

એવં ગુરુપદં શ્રેષ્ઠં દેવાનામપિ દુર્લભમ્ ।
ગરુડોરગગન્ધર્વસિદ્ધાદિસુરપૂજિતમ્ ॥ ૪૮॥

ધ્રુવં દેહિ મુમુક્ષૂણાં નાસ્તિ તત્ત્વં ગુરોઃ પરમ્ ।
ગુરોરારાધનં કુર્યાત્ સ્વજીવત્વં નિવેદયેત્ ॥ ૪૯॥

આસનં શયનં વસ્ત્રં વાહનં ભૂષણાદિકમ્ ।
સાધકેન પ્રદાતવ્યં ગુરુસન્તોષકારણમ્ ॥ ૫૦॥

કર્મણા મનસા વાચા સર્વદાઽઽરાધયેદ્ગુરુમ્ ।
દીર્ઘદણ્ડં નમસ્કૃત્ય નિર્લજ્જો ગુરુસન્નિધૌ ॥ ૫૧॥

શરીરમિન્દ્રિયં પ્રાણમર્થસ્વજનબાન્ધવાન્ ।
આત્મદારાદિકં સર્વં સદ્ગુરુભ્યો નિવેદયેત્ ॥ ૫૨॥

ગુરુરેકો જગત્સર્વં બ્રહ્મવિષ્ણુશિવાત્મકમ્ ।
ગુરોઃ પરતરં નાસ્તિ તસ્માત્સમ્પૂજયેદ્ગુરુમ્ ॥ ૫૩॥

સર્વશ્રુતિશિરોરત્નવિરાજિતપદાંબુજમ્ ।
વેદાન્તાર્થપ્રવક્તારં તસ્માત્ સમ્પૂજયેદ્ગુરુમ્ ॥ ૫૪॥

યસ્ય સ્મરણમાત્રેણ જ્ઞાનમુત્પદ્યતે સ્વયમ્ ।
સઃ એવ સર્વસમ્પત્તિઃ તસ્માત્સમ્પૂજયેદ્ગુરુમ્ ॥ ૫૫॥

કૃમિકોટિભિરાવિષ્ટં દુર્ગન્ધકુલદૂષિતમ્ ।
અનિત્યં દુઃખનિલયં દેહં વિદ્ધિ વરાનને ॥ ૫૬॥

સંસારવૃક્ષમારૂઢાઃ પતન્તિ નરકાર્ણવે ।
યસ્તાનુદ્ધરતે સર્વાન્ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૫૭॥

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુર્ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુરેવ પરં બ્રહ્મ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૫૮॥

અજ્ઞાનતિમિરાન્ધસ્ય જ્ઞાનાઞ્જનશલાકયા ।
ચક્ષુરુન્મીલિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૫૯॥

અખણ્ડમણ્ડલાકારં વ્યાપ્તં યેન ચરાચરમ્ ।
તત્પદં દર્શિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬૦॥

સ્થાવરં જઙ્ગમં વ્યાપ્તં યત્કિઞ્ચિત્સચરાચરમ્ ।
ત્વંપદં દર્શિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬૧॥

ચિન્મયં વ્યાપિતં સર્વં ત્રૈલોક્યં સચરાચરમ્ ।
અસિત્વં દર્શિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬૨॥

નિમિષન્નિમિષાર્ધ્વાદ્વા યદ્વાક્યાદૈ વિમુચ્યતે ।
સ્વાત્માનં શિવમાલોક્ય તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬૩॥

ચૈતન્યં શાશ્વતં શાન્તં વ્યોમાતીતં નિરઞ્જનમ્ ।
નાદબિન્દુકલાતીતં તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬૪॥

નિર્ગુણં નિર્મલં શાન્તં જઙ્ગમં સ્થિરમેવ ચ ।
વ્યાપ્તં યેન જગત્સર્વં તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬૫॥

સ પિતા સ ચ મે માતા સ બન્ધુઃ સ ચ દેવતા ।
સંસારમોહનાશાય તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬૬॥

યત્સત્ત્વેન જગત્સત્યં યત્પ્રકાશેન ભાતિ તત્ ।
યદાનન્દેન નન્દન્તિ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬૭॥

યસ્મિન્સ્થિતમિદં સર્વં ભાતિ યદ્ભાનરૂપતઃ ।
પ્રિયં પુત્રાદિ યત્પ્રીત્યા તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬૮॥

યેનેદં દર્શિતં તત્ત્વં ચિત્તચૈત્યાદિકં તથા ।
જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૬૯॥

યસ્ય જ્ઞાનમિદં વિશ્વં ન દૃશ્યં ભિન્નભેદતઃ ।
સદૈકરૂપરૂપાય તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૦॥

યસ્ય જ્ઞાતં મતં તસ્ય મતં યસ્ય ન વેદ સઃ ।
અનન્યભાવભાવાય તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૧॥

યસ્મૈ કારણરૂપાય કાર્યરૂપેણ ભાતિ યત્ ।
કાર્યકારણરૂપાય તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૨॥

નાનારૂપમિદં વિશ્વં ન કેનાપ્યસ્તિ ભિન્નતા ।
કાર્યકારણરૂપાય તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૩॥

જ્ઞાનશક્તિસમારૂઢતત્ત્વમાલાવિભૂષણે ।
ભુક્તિમુક્તિપ્રદાત્રે ચ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૪॥

અનેકજન્મસમ્પ્રાપ્તકર્મબન્ધવિદાહિને ।
જ્ઞાનાનિલપ્રભાવેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૫॥

શોષણં ભવસિન્ધોશ્ચ દીપનં ક્ષરસમ્પદામ્ ।
ગુરોઃ પાદોદકં યસ્ય તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૬॥

ન ગુરોરધિકં તત્ત્વં ન ગુરોરધિકં તપઃ ।

ન ગુરોરધિકં જ્ઞાનં તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૭॥

મન્નાથઃ શ્રીજગન્નાથો મદ્ગુરુઃ શ્રીજગદ્ગુરુઃ ।
મમાત્મા સર્વભૂતાત્મા તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૮॥

ગુરુરાદિરનાદિશ્ચ ગુરુઃ પરમદૈવતમ્ ।
ગુરુમન્ત્રસમો નાસ્તિ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૭૯॥

એક એવ પરો બન્ધુર્વિષમે સમુપસ્થિતે ।
ગુરુઃ સકલધર્માત્મા તસ્મૈ શ્રીગુરવે નમઃ ॥ ૮૦॥

ગુરુમધ્યે સ્થિતં વિશ્વં વિશ્વમધ્યે સ્થિતો ગુરુઃ ।
ગુરુર્વિશ્વં ન ચાન્યોઽસ્તિ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૮૧॥

ભવારણ્યપ્રવિષ્ટસ્ય દિઙ્મોહભ્રાન્તચેતસઃ ।
યેન સન્દર્શિતઃ પન્થાઃ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૮૨॥

તાપત્રયાગ્નિતપ્તાનામશાન્તપ્રાણિનાં ભુવિ ।
યસ્ય પાદોદકં ગઙ્ગા તસ્મૈ શ્રીગુરવે નમઃ ॥ ૮૩॥ (ગુરુરેવપરા ગઙ્ગા)

અજ્ઞાનસર્પદષ્ટાનાં પ્રાણિનાં કશ્ચિકિત્સકઃ ।
સમ્યગ્જ્ઞાનમહામન્ત્રવેદિનં સદ્ગુરુ વિના ॥ ૮૪॥

હેતવે જગતામેવ સંસારાર્ણવસેતવે ।
પ્રભવે સર્વવિદ્યાનાં શમ્ભવે ગુરવે નમઃ ॥ ૮૫॥

ધ્યાનમૂલં ગુરોર્મૂર્તિઃ પૂજામૂલં ગુરોઃ પદમ્ ।
મન્ત્રમૂલં ગુરોર્વાક્યં મુક્તિમૂલં ગુરોઃ કૃપા ॥ ૮૬॥

સપ્તસાગરપર્યન્તં તીર્થસ્નાનફલં તુ યત્ ।
ગુરુપાદપયોબિન્દોઃ સહસ્રાંશેન તત્ફલમ્ ॥ ૮૭॥

શિવે રુષ્ટે ગુરુસ્ત્રાતા ગુરૌ રુષ્ટે ન કશ્ચન ।
લબ્ધ્વા કુલગુરું સમ્યગ્ગુરુમેવ સમાશ્રયેત્ ॥ ૮૮॥

મધુલુબ્ધો યથા ભૃઙ્ગઃ પુષ્પાત્પુષ્પાન્તરં વ્રજેત્ ।
જ્ઞાનલુબ્ધસ્તથા શિષ્યો ગુરોર્ગુર્વન્તરં વ્રજેત્ ॥ ૮૯॥

વન્દે ગુરુપદદ્વન્દ્વં વાઙ્મનાતીતગોચરમ્ ।
શ્વેતરક્તપ્રભાભિન્નં શિવશક્ત્યાત્મકં પરમ્ ॥ ૯૦॥

ગુકારં ચ ગુણાતીતં રૂકારં રૂપવર્જિતમ્ ।
ગુણાતીતમરૂપં ચ યો દદ્યાત્ સ ગુરુઃ સ્મૃતઃ ॥ ૯૧॥

અત્રિનેત્રઃ શિવઃ સાક્ષાત્ દ્વિબાહુશ્ચ હરિઃ સ્મૃતઃ ।
યોઽચતુર્વદનો બ્રહ્મા શ્રીગુરુઃ કથિતઃ પ્રિયે ॥ ૯૨॥

અયં મયાઞ્જલિર્બદ્ધો દયાસાગરસિદ્ધયે ।
યદનુગ્રહતો જન્તુશ્ચિત્રસંસારમુક્તિભાક્ ॥ ૯૩॥

શ્રીગુરોઃ પરમં રૂપં વિવેકચક્ષુરગ્રતઃ ।
મન્દભાગ્યા ન પશ્યન્તિ અન્ધાઃ સૂર્યોદયં યથા ॥ ૯૪॥

કુલાનાં કુલકોટીનાં તારકસ્તત્ર તત્ક્ષણાત્ ।
અતસ્તં સદ્ગુરુ જ્ઞાત્વા ત્રિકાલમભિવાદયેત્ ॥ ૯૫॥

શ્રીનાથચરણદ્વન્દ્વં યસ્યાં દિશિ વિરાજતે ।
તસ્યાં દિશિ નમસ્કુર્યાદ્ ભક્ત્યા પ્રતિદિનં પ્રિયે ॥ ૯૬॥

સાષ્ટાઙ્ગપ્રણિપાતેન સ્તુવન્નિત્યં ગુરું ભજેત્ ।
ભજનાત્સ્થૈર્યમાપ્નોતિ સ્વસ્વરૂપમયો ભવેત્ ॥ ૯૭॥

દોર્ભ્યાં પદ્ભ્યાં ચ જાનુભ્યામુરસા શિરસા દૃશા ।
મનસા વચસા ચેતિ પ્રણામોષ્ટાઙ્ગ ઉચ્યતે ॥ ૯૮॥

તસ્યૈ દિશે સતતમઞ્જલિરેષ નિત્યમ્
પ્રક્ષિપ્યતાં મુખરિતૈર્મધુરૈઃ પ્રસૂનૈઃ ।
જાગર્તિ યત્ર ભગવાન્ ગુરુચક્રવર્તી
વિશ્વસ્થિતિપ્રલયનાટકનિત્યસાક્ષી ॥ ૯૯॥

અભ્યસ્તૈઃ કિમુ દીર્ઘકાલવિમલૈર્વ્યાદિપ્રદૈર્દુષ્કરૈઃ
પ્રાણાયામશતૈરનેકકરણૈર્દુઃખાત્મકૈર્દુર્જયૈઃ ।
યસ્મિન્નભ્યુદિતે વિનશ્યતિ બલી વાયુઃ સ્વયં તત્ક્ષણાત્
પ્રાપ્તું તત્સહજસ્વભાવમનિશં સેવેત ચૈકં ગુરુમ્ ॥ ૧૦૦॥

જ્ઞાનં વિના મુક્તિપદં લભ્યતે ગુરુભક્તિતઃ ।
ગુરોઃ પ્રસાદતો નાન્યત્ સાધનં ગુરુમાર્ગિણામ્ ॥ ૧૦૧॥ (ગુરોઃ સમાનતો)

યસ્માત્પરતરં નાસ્તિ નેતિ નેતીતિ વૈ શ્રુતિઃ ।
મનસા વચસા ચૈવ સત્યમારાધયેદ્ગુરુમ્ ॥ ૧૦૨॥

ગુરોઃ કૃપાપ્રસાદેન બ્રહ્મવિષ્ણુશિવાદયઃ ।
સામર્થ્યમભજન્ સર્વે સૃષ્ટિસ્થિત્યન્તકર્મણિ ॥ ૧૦૩॥

દેવકિન્નરગન્ધર્વાઃ પિતૃયક્ષાસ્તુ તુમ્બુરુઃ ।
મુનયોઽપિ ન જાનન્તિ ગુરુશુશ્રૂષણે વિધિમ્ ॥ ૧૦૪॥

તાર્કિકાશ્છાન્દસાશ્ચૈવ દૈવજ્ઞાઃ કર્મઠાઃ પ્રિયે ।
લૌકિકાસ્તે ન જાનન્તિ ગુરુતત્ત્વં નિરાકુલમ્ ॥ ૧૦૫॥

મહાહઙ્કારગર્વેણ તતોવિદ્યાબલેન ચ ।
ભ્રમન્ત્યેતસ્મિન્ સંસારે ઘટીયન્ત્રં યથા પુનઃ ॥ ૧૦૬॥

યજ્ઞિનોઽપિ ન મુક્તાઃ સ્યુઃ ન મુક્તાઃ યોગિનસ્તથા ।
તાપસા અપિ નો મુક્ત ગુરુતત્ત્વાત્પરાઙ્મુખાઃ ॥ ૧૦૭॥

ન મુક્તાસ્તુ ગન્ધર્વાઃ પિતૃયક્ષાસ્તુ ચારણાઃ ।
ઋષયઃ સિદ્ધદેવાદ્યાઃ ગુરુસેવાપરાઙ્મુખાઃ ॥ ૧૦૮॥

॥ ઇતિ શ્રીસ્કન્દપુરાણે ઉત્તરખણ્ડે ઉમામહેશ્વર સંવાદે
શ્રી ગુરુગીતાયાં પ્રથમોઽધ્યાયઃ ॥

## ॥ દ્વિતીયોઽધ્યાયઃ ॥

ધ્યાનં શ્રુણુ મહાદેવિ સર્વાનન્દપ્રદાયકમ્ ।
સર્વસૌખ્યકરં ચૈવ ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૧૦૯॥

શ્રીમત્પરં બ્રહ્મ ગુરું સ્મરામિ
શ્રીમત્પરં બ્રહ્મ ગુરું ભજામિ ।
શ્રીમત્પરં બ્રહ્મ ગુરું વદામિ
શ્રીમત્પરં બ્રહ્મ ગુરું નમામિ ॥ ૧૧૦॥

બ્રહ્માનન્દં પરમસુખદં કેવલં જ્ઞાનમૂર્તિમ્
દ્વન્દ્વાતીતં ગગનસદૃશં તત્ત્વમસ્યાદિલક્ષ્યમ્ ।
એકં નિત્યં વિમલમચલં સર્વધીસાક્ષિભૂતમ્
ભાવાતીતં ત્રિગુણરહિતં સદ્ગુરું તં નમામિ ॥ ૧૧૧॥

હૃદમ્બુજે કર્ણિકમધ્યસંસ્થે
સિંહાસને સંસ્થિતદિવ્યમૂર્તિમ્ ।

ધ્યાયેદ્ગુરું ચન્દ્રકલાપ્રકાશમ્
સચ્ચિત્સુખાભીષ્ટવરં દધાનમ્ ॥ ૧૧૨॥

શ્વેતામ્બરં શ્વેતવિલેપપુષ્પમ્
મુક્તાવિભૂષં મુદિતં દ્વિનેત્રમ્ ।
વામાઙ્કપીઠસ્થિતદિવ્યશક્તિમ્
મન્દસ્મિતં પૂર્ણકૃપાનિધાનમ્ ॥ ૧૧૩॥

જ્ઞાનસ્વરૂપં નિજભાવયુક્તમ્ આનન્દમાનન્દકરં પ્રસન્નમ્ ।
યોગીન્દ્રમીડ્યં ભવરોગવૈદ્યમ્ શ્રીમદ્ગુરું નિત્યમહં નમામિ ॥ ૧૧૪॥

વન્દે ગુરૂણાં ચરણારવિન્દમ્ સન્દર્શિતસ્વાત્મસુખામ્બુધીનામ્ ।
જનસ્ય યેષાં ગુલિકાયમાનં સંસારહાલાહલમોહશાન્ત્યૈ ॥ ૧૧૫॥

યસ્મિન્ સૃષ્ટિસ્થિસ્તિધ્વંસનિગ્રહાનુગ્રહાત્મકમ્ ।
કૃત્યં પઞ્ચવિધં શશ્વત્ ભાસતે તં ગુરું ભજેત્ ॥ ૧૧૬॥

પાદાબ્જે સર્વસંસારદાવકાલાનલં સ્વકે ।
બ્રહ્મરન્ધ્રે સ્થિતામ્ભોજમધ્યસ્થં ચન્દ્રમણ્ડલમ્ ॥ ૧૧૭॥

અકથાદિત્રિરેખાબ્જે સહસ્રદલમણ્ડલે ।
હંસપાર્શ્વત્રિકોણે ચ સ્મરેત્તન્મધ્યગં ગુરુમ્ ॥ ૧૧૮॥

નિત્યં શુદ્ધં નિરાભાસં નિરાકારં નિરઞ્જનમ્ ।
નિત્યબોધં ચિદાનન્દં ગુરું બ્રહ્મ નમામ્યહમ્ ॥ ૧૧૯॥

સકલભુવનસૃષ્ટિઃ કલ્પિતાશેષસૃષ્ટિઃ
નિખિલનિગમદૃષ્ટિઃ સત્પદાર્થૈકસૃષ્ટિઃ ।
અતદ્ગણપરમેષ્ટિઃ સત્પદાર્થૈકદૃષ્ટિઃ
ભવગુણપરમેષ્ટિર્મોક્ષમાર્ગૈકદૃષ્ટિઃ ॥ ૧૨૦॥

સકલભુવનરઙ્ગસ્થાપનાસ્તમ્ભયષ્ટિઃ
સકરુણરસવૃષ્ટિસ્તત્ત્વમાલાસમષ્ટિઃ ।
સકલસમયસૃષ્ટિસ્સચ્ચિદાનન્દદૃષ્ટિઃ
નિવસતુ મયિ નિત્યં શ્રીગુરોર્દિવ્યદૃષ્ટિઃ ॥ ૧૨૧॥

ન ગુરોરધિકં ન ગુરોરધિકં
ન ગુરોરધિકં ન ગુરોરધિકમ્ ।
શિવશાસનતઃ શિવશાસનતઃ

શિવશાસનતઃ શિવશાસનતઃ ॥ ૧૨૨॥

ઇદમેવ શિવમિદમેવ શિવમ્ ઇદમેવ શિવમિદમેવ શિવમ્ ।
હરિશાસનતો હરિશાસનતો હરિશાસનતો હરિશાસનતઃ ॥ ૧૨૩॥

વિદિતં વિદિતં વિદિતં વિદિતં
વિજનં વિજનં વિજનં વિજનમ્ ।
વિધિશાસનતો વિધિશાસનતો
વિધિશાસનતો વિધિશાસનતઃ ॥ ૧૨૪॥

એવંવિધં ગુરું ધ્યાત્વા જ્ઞાનમુત્પદ્યતે સ્વયમ્ ।
તદા ગુરૂપદેશેન મુક્તોઽહમિતિ ભાવયેત્ ॥ ૧૨૫॥

ગુરૂપદિષ્ટમાર્ગેણ મનઃશુદ્ધિં તુ કારયેત્ ।
અનિત્યં ખણ્ડયેત્સર્વં યત્કિઞ્ચિદાત્મગોચરમ્ ॥ ૧૨૬॥

જ્ઞેયં સર્વં પ્રતીતં ચ જ્ઞાનં ચ મન ઉચ્યતે ।
જ્ઞાનં જ્ઞેયં સમં કુર્યાન્નાન્યઃ પન્થા દ્વિતીયકઃ ॥ ૧૨૭॥

કિમત્ર બહુનોક્તેન શાસ્ત્રકોટિશતૈરપિ ।
દુર્લભા ચિત્તવિશ્રાન્તિઃ વિના ગુરુકૃપાં પરામ્ ॥ ૧૨૮॥

કરુણાખડ્ગપાતેન છિત્વા પાશાષ્ટકં શિશોઃ ।
સમ્યગાનન્દજનકઃ સદ્ગુરુ સોઽભિધીયતે ॥૧૨૯॥

એવં શ્રુત્વા મહાદેવિ ગુરુનિન્દા કરોતિ યઃ ।
સ યાતિ નરકાન્ ઘોરાન્ યાવચ્ચન્દ્રદિવાકરૌ ॥ ૧૩૦॥

યાવત્કલ્પાન્તકો દેહસ્તાવદ્દેવિ ગુરું સ્મરેત્ ।
ગુરુલોપો ન કર્તવ્યઃ સ્વચ્છન્દો યદિ વા ભવેત્ ॥ ૧૩૧॥

હુઙ્કારેણ ન વક્તવ્યં પ્રાજ્ઞશિષ્યૈ કદાચન ।
ગુરુરાગ્રે ન વક્તવ્યમસત્યં તુ કદાચન ॥ ૧૩૨॥

ગુરું ત્વઙ્કૃત્ય હુઙ્કૃત્ય ગુરુસાન્નિધ્યભાષણઃ ।
અરણ્યે નિર્જલે દેશે સમ્ભવેદ્ બ્રહ્મરાક્ષસઃ ॥ ૧૩૩॥

અદ્વૈતં ભાવયેન્નિત્યં સર્વાવસ્થાસુ સર્વદા ।
કદાચિદપિ નો કુર્યાદ્દ્વૈતં ગુરુસન્નિધૌ ॥ ૧૩૪॥

દૃશ્યવિસ્મૃતિપર્યન્તં કુર્યાદ્ ગુરુપદાર્ચનમ્ ।

તાદૃશસ્યૈવ કૈવલ્યં ન ચ તદ્વ્યતિરેકિણઃ ॥ ૧૩૫॥

અપિ સમ્પૂર્ણતત્ત્વજ્ઞો ગુરુત્યાગિ ભવેદ્યદા ।
ભવેત્યેવ હિ તસ્યાન્તકાલે વિક્ષેપમુત્કટમ્ ॥ ૧૩૬॥

ગુરુકાર્યં ન લઙ્ઘેત નાપૃષ્ટ્વા કાર્યમાચરેત્ ।
ન હ્યુત્તિષ્ઠેદ્દિશેઽનત્વા ગુરુસદ્ભવશોભિતઃ ॥ ૧૩૭॥

ગુરૌ સતિ સ્વયં દેવી પરેષાં તુ કદાચન ।
ઉપદેશં ન વૈ કુર્યાત્ તદા ચેદ્રાક્ષસો ભવેત્ ॥ ૧૩૮॥

ન ગુરુરાશ્રમે કુર્યાત્ દુષ્પાનં પરિસર્પણમ્ ।
દીક્ષા વ્યાખ્યા પ્રભુત્વાદિ ગુરોરાજ્ઞાં ન કારયેત્ ॥ ૧૩૯॥

નોપાશ્રમં ચ પર્યંકં ન ચ પાદપ્રસારણમ્ ।
નાઙ્ગભોગાદિકં કુર્યાન્ન લીલામપરામપિ ॥ ૧૪૦॥

ગુરુણાં સદસદ્વાપિ યદુક્તં તન્ન લઙ્ઘયેત્ ।
કુર્વન્નાજ્ઞાં દિવા રાત્રૌ દાસવન્નિવસેદ્ગુરૌ ॥ ૧૪૧॥

અદત્તં ન ગુરોર્દ્રવ્યમુપભુઞ્જીત કર્હિચિત્ ।
દત્તં ચ રઙ્કવદ્ગ્રાહ્યં પ્રાણોઽપ્યેતેન લભ્યતે ॥ ૧૪૨॥

પાદુકાસનશય્યાદિ ગુરુણા યદભીષ્ટિતમ્ ।
નમસ્કુર્વીત તત્સર્વં પાદાભ્યાં ન સ્પૃશેત્ ક્વચિત્ ॥ ૧૪૩॥

ગચ્છતઃ પૃષ્ઠતો ગચ્છેત્ ગુરુચ્છાયાં ન લઙ્ઘયેત્ ।
નોલ્બણં ધારયેદ્વેષં નાલઙ્કારાસ્તતોલ્બણાન્ ॥ ૧૪૪॥

ગુરુનિન્દાકરં દૃષ્ટ્વા ધાવયેદથ વાસયેત્ ।
સ્થાનં વા તત્પરિત્યાજ્યં જિહ્વાચ્છેદાક્ષમો યદિ ॥ ૧૪૫॥

નોચ્છિષ્ટં કસ્યચિદ્દેયં ગુરોરાજ્ઞાં ન ચ ત્યજેત્ ।
કૃત્સ્નમુચ્છિષ્ટમાદાય હવિર્વદ્ભક્ષયેત્સ્વયમ્ ॥ ૧૪૬॥

નાનૃતં નાપ્રિયં ચૈવ ન ગર્વં નાપિ વા બહુ ।
ન નિયોગધરં બ્રૂયાત્ ગુરોરાજ્ઞાં વિભાવયેત્ ॥ ૧૪૭॥

પ્રભો દેવકુલેશાનાં સ્વામિન્ રાજન્ કુલેશ્વર ।
ઇતિ સમ્બોધનૈર્ભીતો સઞ્ચરેદ્ગુરુસન્નિધૌ ॥ ૧૪૮॥

મુનિભિઃ પન્નગૈર્વાપિ સુરૈર્વા શાપિતો યદિ ।
કાલમૃત્યુભયાદ્વાપિ ગુરુઃ સન્ત્રાતિ પાર્વતિ ॥ ૧૪૯॥

અશક્તા હિ સુરાધાશ્ચ હ્યશક્તાઃ મુનયસ્તથા ।
ગુરુશાપોપપન્નસ્ય રક્ષણાય ચ કુત્રચિત્ ॥ ૧૫૦॥

મન્ત્રરાજમિદં દેવિ ગુરુરિત્યક્ષરદ્વયમ્ ।
સ્મૃતિવેદપુરાણાનાં સારમેવ ન સંશયઃ ॥ ૧૫૧॥

સત્કારમાનપૂજાર્થં દણ્ડકાષયધારણઃ ।
સ સંન્યાસી ન વક્તવ્યઃ સંન્યાસી જ્ઞાનતત્પરઃ ॥ ૧૫૨॥

વિજાનન્તિ મહાવાક્યં ગુરોશ્ચરણ સેવયા ।
તે વૈ સંન્યાસિનઃ પ્રોક્તા ઇતરે વેષધારિણાઃ ॥ ૧૫૩॥

નિત્યં બ્રહ્મ નિરાકારં નિર્ગુણં સત્યચિદ્ધનમ્ ।
યઃ સાક્ષાત્કુરુતે લોકે ગુરુત્વં તસ્ય શોભતે ॥ ૧૫૪॥
(નિત્યં બ્રહ્મ નિરાકારં નિર્ગુણં બોધયેત્ પરમ્ ।
ભાસયન્ બ્રહ્મભાવમ્ ચ દીપો દીપાન્તરં યથા ॥ ૧૫૪॥)

ગુરુપ્રસાદતઃ સ્વાત્મન્યાત્મારામનિરીક્ષણાત્ ।
સમતા મુક્તિમાર્ગેણ સ્વાત્મજ્ઞાનં પ્રવર્તતે ॥ ૧૫૫॥

આબ્રહ્મસ્તમ્ભપર્યન્તં પરમાત્મસ્વરૂપકમ્ ।
સ્થાવરં જઙ્ગમં ચૈવ પ્રણમામિ જગન્મયમ્ ॥ ૧૫૬॥

વન્દેહં સચ્ચિદાનન્દં ભાવાતીતં જગદ્ગુરુમ્ ।
નિત્યં પૂર્ણં નિરાકારં નિર્ગુણં સ્વાત્મસંસ્થિતમ્ ॥ ૧૫૭॥

પરાત્પરતરં ધ્યાયેન્નિત્યમાનન્દકારકમ્ ।
હૃદયાકાશમધ્યસ્થં શુદ્ધસ્ફટિકસન્નિભમ્ ॥ ૧૫૮॥

સ્ફાટિકે સ્ફાટિકં રૂપં દર્પણે દર્પણો યથા ।
તથાત્મનિ ચિદાકારમાનન્દં સોઽહમિત્યુત ॥ ૧૫૯॥

અઙ્ગુષ્ઠમાત્રં પુરુષં ધ્યાયેચ્ચ ચિન્મયં હૃદિ ।
તત્ર સ્ફુરતિ યો ભાવઃ શ્રુણુ તત્કથયામિ તે ॥ ૧૬૦॥

અજોઽહમમરોઽહં ચ હ્યનાદિનિધનો હ્યહમ્ ।
અવિકારશ્ચિદાનન્દો હ્યણીયાન્મહતો મહાન્ ॥ ૧૬૧॥

અપૂર્વમપરં નિત્યં સ્વયંજ્યોતિર્નિરામયમ્ ।
વિરજં પરમાકાશં ધ્રુવમાનન્દમવ્યયમ્ ॥ ૧૬૨॥

અગોચરં તથાऽગમ્યં નામરૂપવિવર્જિતમ્ ।
નિઃશબ્દં તુ વિજાનીયાત્સ્વભાવાદ્બ્રહ્મ પાર્વતિ ॥ ૧૬૩॥

યથા ગન્ધસ્વભાવાત્વં કર્પૂરકુસુમાદિષુ ।
શીતોષ્ણત્વસ્વભાવત્વં તથા બ્રહ્મણિ શાશ્વતમ્ ॥ ૧૬૪॥

યથા નિજસ્વભાવેન કુણ્ડલકટકાદયઃ ।
સુવર્ણત્વેન તિષ્ઠન્તિ તથાऽહં બ્રહ્મ શાશ્વતમ્ ॥ ૧૬૫॥

સ્વયં તથાવિધો ભૂત્વા સ્થાતવ્યં યત્રકુત્રચિત્ ।
કીટો ભૃઙ્ગ ઇવ ધ્યાનાદ્યથા ભવતિ તાદૃશઃ ॥ ૧૬૬॥

ગુરુધ્યાનં તથા કૃત્વા સ્વયં બ્રહ્મમયો ભવેત્ ।
પિણ્ડે પદે તથા રૂપે મુક્તાસ્તે નાત્ર સંશયઃ ॥ ૧૬૭॥

શ્રીપાર્વતી ઉવાચ ।
પિણ્ડં કિં તુ મહાદેવ પદં કિં સમુદાહૃતમ્ ।
રૂપાતીતં ચ રૂપં કિં એતદાખ્યાહિ શઙ્કર ॥ ૧૬૮॥

શ્રીમહાદેવ ઉવાચ ।
પિણ્ડં કુણ્ડલિની શક્તિઃ પદં હંસમુદાહૃતમ્ ।
રૂપં બિન્દુરિતિ જ્ઞેયં રૂપાતીતં નિરઞ્જનમ્ ॥ ૧૬૯॥

પિણ્ડે મુક્તાઃ પદે મુક્તા રૂપે મુક્તા વરાનને ।
રૂપાતીતે તુ યે મુક્તાસ્તે મુક્તા નાત્ર સંશયઃ ॥ ૧૭૦॥

ગુરોર્ધ્યાનેનૈવ નિત્યં દેહી બ્રહ્મમયો ભવેત્ ।
સ્થિતશ્ચ યત્ર કુત્રાપિ મુક્તોऽસૌ નાત્ર સંશયઃ ॥ ૧૭૧॥

જ્ઞાનં સ્વાનુભવઃ શાન્તિર્વૈરાગ્યં વક્તૃતા ધૃતિઃ ।
(જ્ઞાનં વૈરાગ્યમૈશ્વર્યં યથા શ્રી સમુદાહૃતમ્ ।)
ષડ્ગુણૈશ્વર્યયુક્તો હિ ભગવાન્ શ્રીગુરુઃ પ્રિયે ॥ ૧૭૨॥

ગુરુઃ શિવો ગુરુર્દેવો ગુરુર્બન્ધુઃ શરીરિણામ્ ।
ગુરુરાત્મા ગુરુર્જીવો ગુરોરન્યન્ન વિદ્યતે ॥ ૧૭૩॥

એકાકી નિસ્પૃહઃ શાન્તશ્ચિન્તાસૂયાદિવર્જિતઃ ।

બાલ્યભાવેન યો ભાતિ બ્રહ્મજ્ઞાની સ ઉચ્યતે ॥ ૧૭૪॥

ન સુખં વેદશાસ્ત્રેષુ ન સુખં મન્ત્રયન્ત્રકે ।
ગુરોઃ પ્રસાદાદન્યત્ર સુખં નાસ્તિ મહીતલે ॥ ૧૭૫॥

ચાર્વાકવૈષ્ણવમતે સુખં પ્રભાકરે ન હિ ।
ગુરોઃ પાદાન્તિકે યદ્વત્સુખં વેદાન્તસમ્મતમ્ ॥ ૧૭૬॥

ન તત્સુખં સુરેન્દ્રસ્ય ન સુખં ચક્રવર્તિનામ્ ।
યત્સુખં વીતરાગસ્ય મુનેરેકાન્તવાસિનઃ ॥ ૧૭૭॥

નિત્યં બ્રહ્મરસં પીત્વા તૃપ્તો યઃ પરમાત્મનિ ।
ઇન્દ્રં ચ મન્યતે તુચ્છં નૃપાણાં તત્ર કા કથા ॥ ૧૭૮॥ (ઇન્દ્રં ચ મન્યતે રઙ્કં)

યતઃ પરમકૈવલ્યં ગુરુમાર્ગેણ વૈ ભવેત્ ।
ગુરુભક્તિરતિઅઃ કાર્યા સર્વદા મોક્ષકાઙ્ક્ષિભિઃ ॥ ૧૭૯॥

એક એવાદ્વિતીયોઽહં ગુરુવાક્યેન નિશ્ચિતઃ ।
એવમભ્યસ્યતા નિત્યં ન સેવ્યં વૈ વનાન્તરમ્ ॥ ૧૮૦॥

અભ્યાસાન્નિમિષેણૈવં સમાધિમધિગચ્છતિ ।
આજન્મજનિતં પાપં તત્ક્ષણાદેવ નશ્યતિ ॥ ૧૮૧॥

કિમાવાહનમવ્યક્તૈ વ્યાપકં કિં વિસર્જનમ્ ।
અમૂર્તો ચ કથં પૂજા કથં ધ્યાનં નિરામયે ॥ ૧૮૨॥

ગુરુર્વિષ્ણુઃ સત્ત્વમયો રાજસશ્ચતુરાનનઃ ।
તામસો રુદ્રરૂપેણ સૃજત્યવતિ હન્તિ ચ ॥ ૧૮૩॥

સ્વયં બ્રહ્મમયો ભૂત્વા તત્પરં નાવલોકયેત્ ।
પરાત્પરતરં નાન્યત્ સર્વગં ચ નિરામયમ્ ॥ ૧૮૪॥

તસ્યાવલોકનં પ્રાપ્ય સર્વસઙ્ગવિવર્જિતઃ ।
એકાકી નિઃસ્પૃહઃ શાન્તઃ સ્થાતવ્યં તત્પ્રસાદતઃ ॥ ૧૮૫॥

લબ્ધં વાઽથ ન લબ્ધં વા સ્વલ્પં વા બહુલં તથા ।
નિષ્કામેનૈવ ભોક્તવ્યં સદા સન્તુષ્ટમાનસઃ ॥ ૧૮૬॥

સર્વજ્ઞપદમિત્યાહુર્દેહી સર્વમયો ભુવિ ।
સદાઽનન્દઃ સદા શાન્તો રમતે યત્રકુત્રચિત્ ॥ ૧૮૭॥

યત્રૈવ તિષ્ઠતે સોઽપિ સ દેશઃ પુણ્યભાજનઃ ।
મુક્તસ્ય લક્ષણં દેવિ તવાગ્રે કથિતં મયા ॥ ૧૮૮॥

ઉપદેશસ્ત્વયં દેવિ ગુરુમાર્ગેણ મુક્તિદઃ ।
ગુરુભક્તિસ્તથાત્યાન્તા કર્તવ્યા વૈ મનીષિભિઃ ॥ ૧૮૯॥

નિત્યયુક્તાશ્રયઃ સર્વો વેદકૃત્સર્વવેદકૃત્ ।
સ્વપરજ્ઞાનદાતા ચ તં વન્દે ગુરુમીશ્વરમ્ ॥ ૧૯૦॥

યદ્યપ્યધીતા નિગમાઃ ષડઙ્ગા આગમાઃ પ્રિયે ।
અધ્યાત્માદીનિ શાસ્ત્રાણિ જ્ઞાનં નાસ્તિ ગુરું વિના ॥ ૧૯૧॥

શિવપૂજારતો વાપિ વિષ્ણુપૂજારતોઽથવા ।
ગુરુતત્ત્વવિહીનશ્ચેત્તત્સર્વં વ્યર્થમેવ હિ ॥ ૧૯૨॥

શિવસ્વરૂપમજ્ઞાત્વા શિવપૂજા કૃતા યદિ ।
સા પૂજા નામમાત્રં સ્યાચ્ચિત્રદીપ ઇવ પ્રિયે ॥ ૧૯૩॥

સર્વં સ્યાત્સફલં કર્મ ગુરુદીક્ષાપ્રભાવતઃ ।
ગુરુલાભાત્સર્વલાભો ગુરુહીનસ્તુ બાલિશઃ ॥ ૧૯૪॥

ગુરુહીનઃ પશુઃ કીટઃ પતઙ્ગો વક્તુમર્હતિ ।
શિવરૂપં સ્વરૂપં ચ ન જાનાતિ યતસ્સ્વયમ્ ॥ ૧૯૫॥

તસ્માત્સર્વપ્રયત્નેન સર્વસઙ્ગવિવર્જિતઃ ।
વિહાય શાસ્ત્રજાલાનિ ગુરુમેવ સમાશ્રયેત્ ॥ ૧૯૬॥

નિરસ્તસર્વસન્દેહો એકીકૃત્ય સુદર્શનમ્ ।
રહસ્યં યો દર્શયતિ ભજામિ ગુરુમીશ્વરમ્ ॥ ૧૯૭॥

જ્ઞાનહીનો ગુરુ ત્યાજ્યો મિથ્યાવાદિ વિડમ્બકઃ ।
સ્વવિશ્રાન્તિ ન જાનાતિ પરશાન્તિં કરોતિ કિમ્ ॥ ૧૯૮॥

શિલાયાઃ કિં પરં જ્ઞાનં શિલાસઙ્ઘપ્રતારણે ।
સ્વયં તર્તું ન જાનાતિ પરં નિસ્તારયેત્ કથમ્ ॥ ૧૯૯॥

ન વન્દનીયાસ્તે કષ્ટં દર્શનાદ્ભ્રાન્તિકારકાઃ ।
વર્જયેતાન્ ગુરુન્ દૂરે ધીરાનેવ સમાશ્રયેત્ ॥ ૨૦૦॥

પાખણ્ડિનઃ પાપરતા નાસ્તિકા ભેદબુદ્ધયઃ ।
સ્ત્રીલમ્પટા દુરાચારાઃ કૃતઘ્ના બકવૃત્તયઃ ॥ ૨૦૧॥

કર્મભ્રષ્ટાઃ ક્ષમાનષ્ટા નિન્દ્યતર્કૈશ્ચ વાદિનઃ ।
કામિનઃ ક્રોધિનશ્ચૈવ હિંસ્રાશ્ચણ્ડાઃ શઠાસ્તથા ॥ ૨૦૨॥

જ્ઞાનલુપ્તા ન કર્તવ્યા મહાપાપાસ્તથા પ્રિયે ।
એભ્યો ભિન્નો ગુરુઃ સેવ્યઃ એકભક્ત્યા વિચાર્ય ચ ॥ ૨૦૩॥

શિષ્યાદન્યત્ર દેવેશિ ન વદેદ્યસ્ય કસ્યચિત્ ।
નરાણાં ચ ફલપ્રાપ્તૌ ભક્તિરેવ હિ કારણમ્ ॥ ૨૦૪॥

ગૂઢો દૃઢશ્ચ પ્રીતશ્ચ મૌનેન સુસમાહિતઃ ।
સકૃત્કામગતૌ વાપિ પઞ્ચધા ગુરુરીરિતઃ ॥ ૨૦૫॥

સર્વં ગુરુમુખાલ્લબ્ધં સફલં પાપનાશનમ્ ।
યદ્યદાત્મહિતં વસ્તુ તત્તદ્દ્રવ્યં ન વઞ્ચયેત્ ॥ ૨૦૬॥

ગુરુદેવાર્પણં વસ્તુ તેન તુષ્ટોઽસ્મિ સુવ્રતે ।
શ્રીગુરોઃ પાદુકાં મુદ્રાં મૂલમન્ત્રં ચ ગોપયેત્ ॥ ૨૦૭॥

નતાસ્મિ તે નાથ પદારવિન્દં
બુદ્ધીન્દ્રિયાપ્રાણમનોવચોભિઃ ।
યચ્ચિન્ત્યતે ભાવિત આત્મયુક્તૌ
મુમુક્ષિભિઃ કર્મમયોપશાન્તયે ॥ ૨૦૮॥

અનેન યદ્ભવેત્કાર્યં તદ્વદામિ તવ પ્રિયે ।
લોકોપકારકં દેવિ લૌકિકં તુ વિવર્જયેત્ ॥ ૨૦૯॥

લૌકિકાદ્ધર્મતો યાતિ જ્ઞાનહીનો ભવાર્ણવે ।
જ્ઞાનભાવે ચ યત્સર્વં કર્મ નિષ્કર્મ શામ્યતિ ॥ ૨૧૦॥

ઇમાં તુ ભક્તિભાવેન પઠેદ્વૈ શ્રૃણુયાદપિ ।
લિખિત્વા યત્પ્રદાનેન તત્સર્વં ફલમશ્નુતે ॥ ૨૧૧॥ (યત્પ્રસાદેન)

ગુરુગીતામિમાં દેવિ હૃદિ નિત્યં વિભાવય ।
મહાવ્યાધિગતૈર્દુઃખૈઃ સર્વદા પ્રજપેન્મુદા ॥ ૨૧૨॥

ગુરુગીતાક્ષરૈકૈકં મન્ત્રરાજમિદં પ્રિયે ।
અન્યે ચ વિવિધા મન્ત્રાઃ કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૨૧૩॥

અનન્ત ફલમાપ્નોતિ ગુરુગીતા જપેન તુ ।

સર્વપાપહરા દેવિ સર્વદારિદ્ર્યનાશિની ॥ ૨૧૪॥

અકાલમૃત્યુહર્ત્રી ચ સર્વસઙ્કટનાશિની । (અકાલમૃત્યુહન્ત્રી)
યક્ષરાક્ષસભૂતાદિચોરવ્યાઘ્રવિઘાતિની ॥ ૨૧૫॥

સર્વોપદ્રવકુષ્ઠાદિદુષ્ટદોષનિવારિણી ।
યત્ફલં ગુરુસાન્નિધ્યાત્તત્ફલં પઠનાદ્ભવેત્ ॥ ૨૧૬॥

મહાવ્યાધિહરા સર્વવિભૂતેઃ સિદ્ધિદા ભવેત્ ।
અથવા મોહને વશ્યે સ્વયમેવ જપેત્સદા ॥ ૨૧૭॥

કુશદૂર્વાસને દેવિ હ્યાસને શુભ્રકમ્બલે ।
ઉપવિશ્ય તતો દેવિ જપેદેકાગ્રમાનસઃ ॥ ૨૧૮॥

શુક્લં સર્વત્ર વૈ પ્રોક્તં વશ્યે રક્તાસનં પ્રિયે ।
પદ્માસને જપેન્નિત્યં શાન્તિવશ્યકરં પરમ્ ॥ ૨૧૯॥

વસ્ત્રાસને ચ દારિદ્ર્યં પાષાણે રોગસમ્ભવઃ ।
મેદિન્યાં દુઃખમાપ્નોતિ કાષ્ઠે ભવતિ નિષ્ફલમ્ ॥ ૨૨૦॥

કૃષ્ણાજિને જ્ઞાનસિદ્ધિર્મોક્ષશ્રીવ્યાઘ્રચર્મણિ ।
કુશાસને જ્ઞાનસિદ્ધિઃ સર્વસિદ્ધિસ્તુ કમ્બલે ॥ ૨૨૧॥

આગ્નેય્યાં કર્ષણં ચૈવ વાયવ્યાં શત્રુનાશનમ્ ।
નૈરૃત્યાં દર્શનં ચૈવ ઈશાન્યાં જ્ઞાનમેવ ચ ॥ ૨૨૨॥

ઉદઙ્મુખઃ શાન્તિજપ્યે વશ્યે પૂર્વમુખસ્તથા ।
યામ્યે તુ મારણં પ્રોક્તં પશ્ચિમે ચ ધનાગમઃ ॥ ૨૨૩॥

મોહનં સર્વભૂતાનાં બન્ધમોક્ષકરં પરમ્ ।
દેવરાજ્ઞાં પ્રિયકરં રાજાનં વશમાનયેત્ ॥ ૨૨૪॥

મુખસ્તમ્ભકરં ચૈવ ગુણાનાં ચ વિવર્ધનમ્ ।
દુષ્કર્મનાશનં ચૈવ તથા સત્કર્મસિદ્ધિદમ્ ॥ ૨૨૫॥

અસિદ્ધં સાધયેત્કાર્યં નવગ્રહભયાપહમ્ ।
દુઃસ્વપ્નનાશનં ચૈવ સુસ્વપ્નફલદાયકમ્ ॥ ૨૨૬॥

મોહશાન્તિકરં ચૈવ બન્ધમોક્ષકરં પરમ્ ।
સ્વરૂપજ્ઞાનનિલયં ગીતાશાસ્ત્રમિદં શિવે ॥ ૨૨૭॥

યં યં ચિન્તયતે કામં તં તં પ્રાપ્નોતિ નિશ્ચયમ્ ।
નિત્યં સૌભાગ્યદં પુણ્યં તાપત્રયકુલાપહમ્ ॥ ૨૨૮॥

સર્વશાન્તિકરં નિત્યં તથા વન્ધ્યા સુપુત્રદમ્ ।
અવૈધવ્યકરં સ્ત્રીણાં સૌભાગ્યસ્ય વિવર્ધનમ્ ॥ ૨૨૯॥

આયુરારોગ્યમૈશ્વર્યં પુત્રપૌત્રપ્રવર્ધનમ્ ।
નિષ્કામજાપી વિધવા પઠેન્મોક્ષમવાપ્નુયાત્ ॥ ૨૩૦॥

અવૈધવ્યં સકામા તુ લભતે ચાન્યજન્મનિ ।
સર્વદુઃખમયં વિઘ્નં નાશયેત્તાપહારકમ્ ॥ ૨૩૧॥

સર્વપાપપ્રશમનં ધર્મકામાર્થમોક્ષદમ્ ।
યં યં ચિન્તયતે કામં તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ॥ ૨૩૨॥

કામ્યાનાં કામધેનુર્વૈ કલ્પિતે કલ્પપાદપઃ ।
ચિન્તામણિશ્ચિન્તિતસ્ય સર્વમઙ્ગલકારકમ્ ॥ ૨૩૩॥

લિખિત્વા પૂજયેદ્યસ્તુ મોક્ષશ્રિયમવાપ્નુયાત્ ।
ગુરૂભક્તિર્વિશેષેણ જાયતે હૃદિ સર્વદા ॥ ૨૩૪॥

જપન્તિ શાક્તાઃ સૌરાશ્ચ ગાણપત્યાશ્ચ વૈષ્ણવાઃ ।
શૈવાઃ પાશુપતાઃ સર્વે સત્યં સત્યં ન સંશયઃ ॥ ૨૩૫॥

॥ ઇતિ શ્રીસ્કન્દપુરાણે ઉત્તરખણ્ડે ઉમામહેશ્વર સંવાદે
શ્રી ગુરુગીતાયાં દ્વિતીયોઽધ્યાયઃ ॥

## ॥ તૃતીયઃ અધ્યાયઃ ॥

અથ કામ્યજપસ્થાનં કથયામિ વરાનને ।
સાગરાન્તે સરિત્ તીરે તીર્થે હરિહરાલયે ॥ ૨૩૬॥

શક્તિદેવાલયે ગોષ્ઠે સર્વદેવાલયે શુભે ।
વટસ્ય ધાત્ર્યા મૂલે વા મઠે વૃન્દાવને તથા ॥ ૨૩૭॥

પવિત્રે નિર્મલે દેશે નિત્યાનુષ્ઠાનતોઽપિ વા ।
નિર્વેદનેન મૌનેન જપમેતત્ સમારભેત્ ॥ ૨૩૮॥

જાપ્યેન જયમાપ્નોતિ જપસિદ્ધિં ફલં તથા ।
હીનકર્મ ત્યજેત્સર્વં ગર્હિતસ્થાનમેવ ચ ॥ ૨૩૯॥

શ્મશાને બિલ્વમૂલે વા વટમૂલાન્તિકે તથા ।
સિદ્ધ્યન્તિ કાનકે મૂલે ચૂતવૃક્ષસ્ય સન્નિધૌ ॥ ૨૪૦॥

પીતાસનં મોહને તુ હ્યસિતં ચાભિચારિકે ।
જ્ઞેયં શુક્લં ચ શાન્ત્યર્થં વશ્યે રક્તં પ્રકીર્તિતમ્ ॥ ૨૪૧॥

જપં હીનાસનં કુર્વન્ હીનકર્મફલપ્રદમ્ ।
ગુરુગીતાં પ્રયાણે વા સઙ્ગ્રામે રિપુસઙ્કટે ॥ ૨૪૨॥

જપન્ જયમવાપ્નોતિ મરણે મુક્તિદાયિકા ।
સર્વકર્માણિ સિદ્ધ્યન્તિ ગુરુપુત્રે ન સંશયઃ ॥ ૨૪૩॥

ગુરુમન્ત્રો મુખે યસ્ય તસ્ય સિદ્ધ્યન્તિ નાન્યથા ।
દીક્ષયા સર્વકર્માણિ સિદ્ધ્યન્તિ ગુરુપુત્રકે ॥ ૨૪૪॥

ભવમૂલવિનાશાય ચાષ્ટપાશનિવૃત્તયે ।
ગુરુગીતામ્ભસિ સ્નાનં તત્ત્વજ્ઞઃ કુરુતે સદા ॥ ૨૪૫॥

સ એવં સદ્ગુરુઃ સાક્ષાત્ સદસદ્બ્રહ્મવિત્તમઃ ।
તસ્ય સ્થાનાનિ સર્વાણિ પવિત્રાણિ ન સંશયઃ ॥ ૨૪૬॥

સર્વશુદ્ધઃ પવિત્રોઽસૌ સ્વભાવાદ્યત્ર તિષ્ઠતિ ।
તત્ર દેવગણાઃ સર્વે ક્ષેત્રપીઠે ચરન્તિ ચ ॥ ૨૪૭॥

આસનસ્થાઃ શયાના વા ગચ્છન્તતિષ્ઠન્તોઽપિ વા ।
અશ્વારૂઢા ગજારૂઢાઃ સુષુપ્તા જાગ્રતોઽપિ વા ॥ ૨૪૮॥

શુચિભૂતા જ્ઞાનવન્તો ગુરુગીતા જપન્તિ યે ।
તેષાં દર્શનસંસ્પર્ષાત્ દિવ્યજ્ઞાનં પ્રજાયતે ॥ ૨૪૯॥ (દર્શનસંસ્પર્ષાત્ પુનર્ જન્મ ન વિદ્યતે)

સમુદ્રે વૈ યથા તોયં ક્ષીરે ક્ષીરં જલે જલમ્ । (ક્ષીરે ક્ષીરં ઘૃતે ઘૃતમ્)
ભિન્ને કુમ્ભે યથાકાશં તથાઽઽત્મા પરમાત્મનિ ॥ ૨૫૦॥

તથૈવ જ્ઞાનવાન્ જીવ પરમાત્મનિ સર્વદા ।
ઐક્યેન રમતે જ્ઞાની યત્ર કુત્ર દિવાનિશમ્ ॥ ૨૫૧॥

એવંવિધો મહાયુક્તઃ સર્વત્ર વર્તતે સદા ।
તસ્માત્સર્વપ્રકારેણ ગુરુભક્તિં સમાચરેત્ ॥ ૨૫૨॥

ગુરુસન્તોષણાદેવ મુક્તો ભવતિ પાર્વતિ ।

અણિમાદિષુ ભોક્તૃત્વં કૃપયા દેવિ જાયતે ॥ ૨૫૩॥

સામ્યેન રમતે જ્ઞાની દિવા વા યદિ વા નિશિ ।
એવં વિધૌ મહામૌની ત્રૈલોક્યસમતાં વ્રજેત્ ॥ ૨૫૪॥

અથ સંસારિણઃ સર્વે ગુરુગીતાજપેન તુ ।
સર્વાન્ કામાંસ્તુ ભુઞ્જન્તિ ત્રિસત્યં મમ ભાષિતમ્ ॥ ૨૫૫॥

સત્યં સત્યં પુનઃ સત્યં ધર્મસારં મયોદિતમ્ ।
ગુરુગીતાસમં સ્તોત્રં નાસ્તિ તત્ત્વં ગુરોઃ પરમ્ ॥ ૨૫૬॥

ગુરુર્દેવો ગુરુર્ધર્મો ગુરૌ નિષ્ઠા પરં તપઃ ।
ગુરોઃ પરતરં નાસ્તિ ત્રિવારં કથયામિ તે ॥ ૨૫૭॥

ધન્યા માતા પિતા ધન્યો ગોત્રં ધન્યં કુલોદ્ભવઃ ।
ધન્યા ચ વસુધા દેવિ યત્ર સ્યાદ્ગુરુભક્તતા ॥ ૨૫૮॥

આકલ્પજન્મ કોટીનાં યજ્ઞવ્રતતપઃક્રિયાઃ ।
તાઃ સર્વાઃ સફલા દેવિ ગુરૂસન્તોષમાત્રતઃ ॥ ૨૫૯॥

શરીરમિન્દ્રિયં પ્રાણશ્ચાર્થઃ સ્વજનબન્ધુતામ્ ।
માતૃકુલં પિતૃકુલં ગુરુરેવ ન સંશયઃ ॥ ૨૬૦॥

મન્દભાગ્યા હ્યશક્તાશ્ચ યે જના નાનુમન્વતે ।
ગુરુસેવાસુ વિમુખાઃ પચ્યન્તે નરકેઽશુચૌ ॥ ૨૬૧॥

વિદ્યા ધનં બલં ચૈવ તેષાં ભાગ્યં નિરર્થકમ્ ।
યેષાં ગુરૂકૃપા નાસ્તિ અધો ગચ્છન્તિ પાર્વતી ॥ ૨૬૨॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ દેવતાઃ પિતૃકિન્નરાઃ ।
સિદ્ધચારણયક્ષાશ્ચ અન્યે ચ મુનયો જનાઃ ॥ ૨૬૩॥

ગુરુભાવઃ પરં તીર્થમન્યતીર્થં નિરર્થકમ્ ।
સર્વતીર્થમયં દેવિ શ્રીગુરોશ્ચરણામ્બુજમ્ ॥ ૨૬૪॥

કન્યાભોગરતા મન્દાઃ સ્વકાન્તાયાઃ પરાઙ્મુખાઃ ।
અતઃ પરં મયા દેવિ કથિતન્ન મમ પ્રિયે ॥ ૨૬૫॥

ઇદં રહસ્યમસ્પષ્ટં વક્તવ્યં ચ વરાનને ।
સુગોપ્યં ચ તવાગ્રે તુ મમાત્મપ્રીતયે સતિ ॥ ૨૬૬॥

સ્વામિમુખ્યગણેશાદ્યાન્ વૈષ્ણવાદીંશ્ચ પાર્વતિ ।
ન વક્તવ્યં મહામાયે પાદસ્પર્શં કુરુષ્વ મે ॥ ૨૬૭॥

અભક્તે વઞ્ચકે ધૂર્તે પાખણ્ડે નાસ્તિકાદિષુ ।
મનસાઽપિ ન વક્તવ્યા ગુરુગીતા કદાચન ॥ ૨૬૮॥

ગુરવો બહવઃ સન્તિ શિષ્યવિત્તાપહારકાઃ ।
તમેકં દુર્લભં મન્યે શિષ્યહૃત્તાપહારકમ્ ॥ ૨૬૯॥

ચાતુર્યવાન્ વિવેકી ચ અધ્યાત્મજ્ઞાનવાન્ શુચિઃ ।
માનસં નિર્મલં યસ્ય ગુરુત્વં તસ્ય શોભતે ॥ ૨૭૦॥

ગુરવો નિર્મલાઃ શાન્તાઃ સાધવો મિતભાષિણઃ ।
કામક્રોધવિનિર્મુક્તાઃ સદાચારા જિતેન્દ્રિયાઃ ॥ ૨૭૧॥

સૂચકાદિપ્રભેદેન ગુરવો બહુધા સ્મૃતાઃ ।
સ્વયં સમ્યક્ પરીક્ષ્યાથ તત્ત્વનિષ્ઠં ભજેત્સુધીઃ ॥ ૨૭૨॥

વર્ણજાલમિદં તદ્વદ્બાહ્યશાસ્ત્રં તુ લૌકિકમ્ ।
યસ્મિન્ દેવિ સમભ્યસ્તં સ ગુરુઃ સુચકઃ સ્મૃતઃ ॥ ૨૭૩॥

વર્ણાશ્રમોચિતાં વિદ્યાં ધર્માધર્મવિધાયિનીમ્ ।
પ્રવક્તારં ગુરું વિદ્ધિ વાચકસ્ત્વતિ પાર્વતિ ॥ ૨૭૪॥

પઞ્ચાક્ષર્યાદિમન્ત્રાણામુપદેષ્ટા તુ પાર્વતિ ।
સ ગુરુર્બોધકો ભૂયાદુભયોરયમુત્તમઃ ॥ ૨૭૫॥

મોહમારણવશ્યાદિતુચ્છમન્ત્રોપદર્શિનમ્ ।
નિષિદ્ધગુરુરિત્યાહુઃ પણ્ડિતસ્તત્ત્વદર્શિનઃ ॥ ૨૭૬॥

અનિત્યમિતિ નિર્દિશ્ય સંસારે સઙ્કટાલયમ્ ।
વૈરાગ્યપથદર્શી યઃ સ ગુરુર્વિહિતઃ પ્રિયે ॥ ૨૭૭॥

તત્ત્વમસ્યાદિવાક્યાનામુપદેષ્ટા તુ પાર્વતિ ।
કારણાખ્યો ગુરુઃ પ્રોક્તો ભવરોગનિવારકઃ ॥ ૨૭૮॥

સર્વસન્દેહસન્દોહનિર્મૂલનવિચક્ષણઃ ।
જન્મમૃત્યુભયઘ્નો યઃ સ ગુરુઃ પરમો મતઃ ॥ ૨૭૯॥

બહુજન્મકૃતાત્ પુણ્યાલ્લભ્યતેઽસૌ મહાગુરુઃ ।
લબ્ધ્વાઽમું ન પુનર્યાતિ શિષ્યઃ સંસારબન્ધનમ્ ॥ ૨૮૦॥

એવં બહુવિધા લોકે ગુરવઃ સન્તિ પાર્વતિ ।
તેષુ સર્વપ્રયત્નેન સેવ્યો હિ પરમો ગુરુઃ ॥ ૨૮૧॥

નિષિદ્ધગુરુશિષ્યસ્તુ દુષ્ટસઙ્કલ્પદૂષિતઃ ।
બ્રહ્મપ્રલયપર્યન્તં ન પુનર્યાતિ મૃત્યતામ્ ॥ ૨૮૨॥

એવં શ્રુત્વા મહાદેવી મહાદેવવચસ્તથા ।
અત્યન્તવિહ્વલમના શઙ્કરં પરિપૃચ્છતિ ॥ ૨૮૩॥

પાર્વત્યુવાચ ।
નમસ્તે દેવદેવાત્ર શ્રોતવ્યં કિંચિદસ્તિ મે ।
શ્રુત્વા ત્વદ્વાક્યમધુના ભૃશં સ્યાદ્વિહ્વલં મનઃ ॥ ૨૮૪॥

સ્વયં મૂઢા મૃત્યુભીતાઃ સુકૃતાદ્વિરતિં ગતાઃ ।
દૈવાન્નિષિદ્ધગુરુગા યદિ તેષાં તુ કા ગતિઃ ॥ ૨૮૫॥

શ્રી મહાદેવ ઉવાચ ।
શ્રુણુ તત્ત્વમિદં દેવિ યદા સ્યાદ્વિરતો નરઃ ।
તદાઽસાવધિકારીતિ પ્રોચ્યતે શ્રુતિમસ્તકૈઃ ॥ ૨૮૬॥

અખણ્ડૈકરસં બ્રહ્મ નિત્યમુક્તં નિરામયમ્ ।
સ્વસ્મિન્ સન્દર્શિતં યેન સ ભવેદસ્ય દેશિકઃ ॥ ૨૮૭॥

જલાનાં સાગરો રાજા યથા ભવતિ પાર્વતિ ।
ગુરૂણાં તત્ર સર્વેષાં રાજાયં પરમો ગુરુઃ ॥ ૨૮૮॥

મોહાદિરહિતઃ શાન્તો નિત્યતૃપ્તો નિરાશ્રયઃ ।
તૃણીકૃતબ્રહ્મવિષ્ણુવૈભવઃ પરમો ગુરુઃ ॥ ૨૮૯॥

સર્વકાલવિદેશેષુ સ્વતન્ત્રો નિશ્ચલસ્સુખી ।
અખણ્ડૈકરસાસ્વાદતૃપ્તો હિ પરમો ગુરુઃ ॥ ૨૯૦॥

દ્વૈતાદ્વૈતવિનિર્મુક્તઃ સ્વાનુભૂતિપ્રકાશવાન્ ।
અજ્ઞાનાન્ધતમશ્છેત્તા સર્વજ્ઞ પરમો ગુરુઃ ॥ ૨૯૧॥

યસ્ય દર્શનમાત્રેણ મનસઃ સ્યાત્ પ્રસન્નતા ।
સ્વયં ભૂયાત્ ધૃતિશ્શાન્તિઃ સ ભવેત્ પરમો ગુરુઃ ॥ ૨૯૨॥

સિદ્ધિજાલં સમાલોક્ય યોગિનાં મન્ત્રવાદિનામ્ ।

તુચ્છાકારમનોવૃત્તિર્યસ્યાસૌ પરમો ગુરુઃ ॥ ૨૯૩॥

સ્વશરીરં શવં પશ્યન્ તથા સ્વાત્માનમદ્વયમ્ ।
યઃ સ્ત્રીકનકમોહઘ્નઃ સ ભવેત્ પરમો ગુરુઃ ॥ ૨૯૪॥

મૌની વાગ્મીતિ તત્ત્વજ્ઞો દ્વિધાભૂચ્છૃણુ પાર્વતિ ।
ન કશ્ચિન્મૌનિના લાભો લોકેઽસ્મિન્ભવતિ પ્રિયે ॥ ૨૯૫॥

વાગ્મી તૂત્કટસંસારસાગરોત્તારણક્ષમઃ ।
યતોસૌ સંશયચ્છેત્તા શાસ્ત્રયુક્ત્યનુભૂતિભિઃ ॥ ૨૯૬॥

ગુરુનામજપાદ્દેવિ બહુજન્માર્જિતાન્યપિ ।
પાપાનિ વિલયં યાન્તિ નાસ્તિ સન્દેહમણ્વપિ ॥ ૨૯૭॥

શ્રીગુરોસ્સદૃશં દૈવં શ્રીગુરોસદૃશઃ પિતા ।
ગુરુધ્યાનસમં કર્મ નાસ્તિ નાસ્તિ મહીતલે ॥ ૨૯૮॥

કુલં ધનં બલં શાસ્ત્રં બાન્ધવાસ્સોદરા ઇમે ।
મરણે નોપયુજ્યન્તે ગુરુરેકો હિ તારકઃ ॥ ૨૯૯॥

કુલમેવ પવિત્રં સ્યાત્ સત્યં સ્વગુરુસેવયા ।
તૃપ્તાઃ સ્યુસ્સકલા દેવા બ્રહ્માદ્યા ગુરુતર્પણાત્ ॥ ૩૦૦॥

ગુરુરેકો હિ જાનાતિ સ્વરૂપં દેવમવ્યયમ્ ।
તજ્જ્ઞાનં યત્પ્રસાદેન નાન્યથા શાસ્ત્રકોટિભિઃ ॥ ૩૦૧॥

સ્વરૂપજ્ઞાનશૂન્યેન કૃતમપ્યકૃતં ભવેત્ ।
તપો જપાદિઅકં દેવિ સકલં બાલજલ્પવત્ ॥ ૩૦૨॥

શિવં કેચિદ્ધરિં કેચિદ્વિધિં કેચિત્તુ કેચન ।
શક્તિં દેવમિતિ જ્ઞાત્વા વિવદન્તિ વૃથા નરાઃ ॥ ૩૦૩॥

ન જાનન્તિ પરં તત્ત્વં ગુરુદીક્ષાપરાઙ્મુખાઃ ।
ભ્રાન્તાઃ પશુસમા હ્યેતે સ્વપરિજ્ઞાનવર્જિતાઃ ॥ ૩૦૪॥

તસ્માત્કૈવલ્યસિદ્ધ્યર્થં ગુરુમેવ ભજેત્પ્રિયે ।
ગુરું વિના ન જાનન્તિ મૂઢાસ્તત્પરમં પદમ્ ॥ ૩૦૫॥

ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે સર્વકર્માણિ ગુરોઃ કરુણયા શિવે ॥ ૩૦૬॥

કૃતાયા ગુરુભક્તેસ્તુ વેદશાસ્ત્રાનુસારતઃ ।
મુચ્યતે પાતકાદ્ઘોરાદ્ગુરુભક્તો વિશેષતઃ ॥ ૩૦૭॥

દુઃસઙ્ગં ચ પરિત્યજ્ય પાપકર્મ પરિત્યજેત્ ।
ચિત્તચિહ્નમિદં યસ્ય દીક્ષા વિધીયતે ॥ ૩૦૮॥

ચિત્તત્યાગનિયુક્તશ્ચ ક્રોધગર્વવિવર્જિતઃ ।
દ્વૈતભાવપરિત્યાગી તસ્ય દીક્ષા વિધીયતે ॥ ૩૦૯॥

એતલ્લક્ષણ સંયુક્તં સર્વભૂતહિતે રતમ્ ।
નિર્મલં જીવિતં યસ્ય તસ્ય દીક્ષા વિધીયતે ॥ ૩૧૦॥

ક્રિયયા ચાન્વિતં પૂર્વં દીક્ષાજાલં નિરૂપિતમ્ ।
મન્ત્રદીક્ષાભિર્ધ્ર સાઙ્ગોપાઙ્ગ શિવોદિતમ્ ॥ ૩૧૧॥

ક્રિયયા સ્યાદ્વિરહિતાં ગુરૂસાયુજ્યદાયિનીમ્ ।
ગુરુદીક્ષાં વિના કો વા ગુરુત્વાચારપાલકઃ ॥ ૩૧૨॥

શક્તો ન ચાપિ શક્તો વા દૈશિકાઙ્ઘ્રિસમાશ્રયાત્ ।
તસ્ય જન્માસ્તિ સફલં ભોગમોક્ષફલપ્રદમ્ ॥ ૩૧૩॥

અત્યન્તચિત્તપક્વસ્ય શ્રદ્ધાભક્તિયુતસ્ય ચ ।
પ્રવક્તવ્યમિદં દેવિ મમાત્મપ્રીતયે સદા ॥ ૩૧૪॥

રહસ્યં સર્વશાસ્ત્રેષુ ગીતાશાસ્ત્રદં શિવે ।
સમ્યક્પરીક્ષ્ય વક્તવ્યં સાધકસ્ય મહાત્મનઃ ॥ ૩૧૫॥

સત્કર્મપરિપાકાચ્ચ ચિત્તશુદ્ધસ્ય ધીમતઃ ।
સાધકસ્યૈવ વક્તવ્યા ગુરુગીતા પ્રયત્નતઃ ॥ ૩૧૬॥

નાસ્તિકાય કૃતઘ્નાય દામ્ભિકાય શઠાય ચ ।
અભક્તાય વિભક્તાય ન વાચ્યેયં કદાચન ॥ ૩૧૭॥

સ્ત્રીલોલુપાય મૂર્ખાય કામોપહતચેતસે ।
નિન્દકાય ન વક્તવ્યા ગુરુગીતા સ્વભાવતઃ ॥ ૩૧૮॥

સર્વ પાપપ્રશમનં સર્વોપદ્રવવારકમ્ ।
જન્મમૃત્યુહરં દેવિ ગીતાશાસ્ત્રમિદં શિવે ॥ ૩૧૯॥

શ્રુતિસારમિદં દેવિ સર્વમુક્તં સમાસતઃ ।
નાન્યથા સદ્ગતિઃ પુંસાં વિના ગુરુપદં શિવે ॥ ૩૨૦॥

બહુજન્મકૃતાત્પાદયમર્થો ન રોચતે ।
જન્મબન્ધનિવૃત્યર્થં ગુરુમેવ ભજેત્સદા ॥ ૩૨૧॥

અહમેવ જગત્સર્વમહમેવ પરં પદમ્ ।
એતજ્જ્ઞાનં યતો ભૂયાત્તં ગુરું પ્રણમામ્યહમ્ ॥ ૩૨૨॥

અલં વિકલ્પૈરહમેવ કેવલો મયિ સ્થિતં વિશ્વમિદં ચરાચરમ્ ।
ઇદં રહસ્યં મમ યેન દર્શિતમ્ સ વન્દનીયો ગુરુરેવ કેવલમ્ ॥ ૩૨૩॥

યસ્યાન્તં નાદિમધ્યં ન હિ કરચરણં નામગોત્રં ન સૂત્રમ્ ।
નો જાતિર્નૈવ વર્ણો ન ભવતિ પુરુષો નો નપુંસં ન ચ સ્ત્રી ॥ ૩૨૪॥

નાકારં નો વિકારં ન હિ જનિમરણં નાસ્તિ પુણ્યં ન પાપમ્ ।
નોઽતત્ત્વં તત્ત્વમેકં સહજસમરસં સદ્ગુરું તં નમામિ ॥ ૩૨૫॥

નિત્યાય સત્યાય ચિદાત્મકાય નવ્યાય ભવ્યાય પરાત્પરાય ।
શુદ્ધાય બુદ્ધાય નિરઞ્જનાય નમોઽસ્ય નિત્યં ગુરુશેખરાય ॥ ૩૨૬॥

સચ્ચિદાનન્દરૂપાય વ્યાપિને પરમાત્મને ।
નમઃ શ્રીગુરુનાથાય પ્રકાશાનન્દમૂર્તયે ॥ ૩૨૭॥

સત્યાનન્દસ્વરૂપાય બોધૈકસુખકારિણે ।
નમો વેદાન્તવેદ્યાય ગુરવે બુદ્ધિસાક્ષિણે ॥ ૩૨૮॥

નમસ્તે નાથ ભગવન્ શિવાય ગુરુરૂપિણે ।
વિદ્યાવતારસંસિદ્ધ્યૈ સ્વીકૃતાનેકવિગ્રહ ॥ ૩૨૯॥

નવાય નવરૂપાય પરમાર્થૈકરૂપિણે ।
સર્વાજ્ઞાનતમોભેદભાનવે ચિદ્ઘનાય તે ॥ ૩૩૦॥

સ્વતન્ત્રાય દયાક્લૃપ્તવિગ્રહાય શિવાત્મને ।
પરતન્ત્રાય ભક્તાનાં ભવ્યાનાં ભવ્યરૂપિણે ॥ ૩૩૧॥

વિવેકિનાં વિવેકાય વિમર્શાય વિમર્શિનામ્ ।
પ્રકાશિનાં પ્રકાશાય જ્ઞાનિનાં જ્ઞાનરૂપિણે ॥ ૩૩૨॥

પુરસ્તત્પાર્શ્વયોઃ પૃષ્ઠે નમસ્કુર્યાદુપર્યધઃ ।
સદા મચ્ચિત્તરૂપેણ વિધેહિ ભવદાસનમ્ ॥ ૩૩૩॥

(૩૨૯-૩૩૩ તન્ત્રરાજતન્ત્રે પ્રથમપટલે ૯૬-૧૦૦)

શ્રીગુરું પરમાનન્દં વન્દે હ્યાનન્દવિગ્રહમ્ ।
યસ્ય સન્નિધિમાત્રેણ ચિદાનન્દાય તે મનઃ ॥ ૩૩૪॥

નમોऽસ્તુ ગુરવે તુભ્યં સહજાનન્દરૂપિણે ।
યસ્ય વાગમૃતં હન્તિ વિષં સંસારસંજ્ઞકમ્ ॥ ૩૩૫॥

નાનાયુક્તોપદેશેન તારિતા શિષ્યસન્તતિઃ ।
તત્કૃતાસારવેદેન ગુરુચિત્પદમચ્યુતમ્ ॥ ૩૩૬॥

અચ્યુતાય મનસ્તુભ્યં ગુરવે પરમાત્મને ।
સર્વતન્ત્રસ્વતન્ત્રાય ચિદ્ઘનાનન્દમૂર્તયે ॥ ૩૩૭॥

નમોચ્યુતાય ગુરવે વિદ્યાવિદ્યાસ્વરૂપિણે ।
શિષ્યસન્માર્ગપટવે કૃપાપીયૂષસિન્ધવે ॥ ૩૩૮॥

ઓમચ્યુતાય ગુરવે શિષ્યસંસારસેતવે ।
ભક્તકાર્યૈકસિંહાય નમસ્તે ચિત્સુખાત્મને ॥ ૩૩૯॥

ગુરુનામસમં દૈવં ન પિતા ન ચ બાન્ધવાઃ ।
ગુરુનામસમઃ સ્વામી નેદૃશં પરમં પદમ્ ॥ ૩૪૦॥

એકાક્ષરપ્રદાતારં યો ગુરુર્નૈવ મન્યતે ।
શ્વાનયોનિશતં ગત્વા ચાણ્ડાલેષ્વપિ જાયતે ॥ ૩૪૧॥

ગુરુત્યાગાદ્ભવેન્મૃત્યુર્મન્ત્રત્યાગાદ્દરિદ્રતા ।
ગુરુમન્ત્રપરિત્યાગી રૌરવં નરકં વ્રજેત્ ॥ ૩૪૨॥

શિવક્રોધાદ્ગુરુસ્ત્રાતા ગુરુક્રોધાચ્છિવો ન હિ ।
તસ્માત્સર્વપ્રયત્નેન ગુરોરાજ્ઞાં ન લઙ્ઘયેત્ ॥ ૩૪૩॥

સંસારસાગરસમુદ્ધરણૈકમન્ત્રં
બ્રહ્માદિદેવમુનિપૂજિતસિદ્ધમન્ત્રમ્ ।
દારિદ્ર્યદુઃખભવરોગવિનાશમન્ત્રં
વન્દે મહાભયહરં ગુરુરાજમન્ત્રમ્ ॥ ૩૪૪॥

સપ્તકોટીમહામન્ત્રાશ્ચિત્તવિભ્રંશકારકાઃ ।
એક એવ મહામન્ત્રો ગુરુરિત્યક્ષરદ્વયમ્ ॥ ૩૪૫॥

એવમુક્ત્વા મહાદેવઃ પાર્વતીં પુનરબ્રવીત્ ।

ઇદમેવ પરં તત્ત્વં શ્રુણુ દેવિ સુખાવહમ્ ॥ ૩૪૬॥

ગુરુતત્ત્વમિદં દેવિ સર્વમુક્તં સમાસતઃ ।
રહસ્યમિદમવ્યક્તન્ન વદેદ્યસ્ય કસ્યચિત્ ॥ ૩૪૭॥

ન મૃષા સ્યાદિયં દેવિ મદુક્તિઃ સત્યરૂપિણિ ।
ગુરુગીતાસમં સ્તોત્રં નાસ્તિ નાસ્તિ મહીતલે ॥ ૩૪૮॥

ગુરુગીતામિમાં દેવિ ભવદુઃખવિનાશિનીમ્ ।
ગુરુદીક્ષાવિહીનસ્ય પુરતો ન પઠેત્ ક્વચિત્ ॥ ૩૪૯॥

રહસ્યમત્યન્તરહસ્યમેતન્ન પાપિના લભ્યમિદં મહેશ્વરિ ।
અનેકજન્માર્જિતપુણ્યપાકાદ્ગુરોસ્તુ તત્ત્વં લભતે મનુષ્યઃ ॥ ૩૫૦॥

યસ્ય પ્રસાદાદહમેવ સર્વં
મય્યેવ સર્વં પરિકલ્પિતં ચ ।
ઇત્થં વિજાનામિ સદાત્મરૂપં
તસ્યાઙ્ઘ્રિપદ્મં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૩૫૧॥

અજ્ઞાનતિમિરાન્ધસ્ય વિષયાક્રાન્તચેતસઃ ।
જ્ઞાનપ્રભાપ્રદાનેન પ્રસાદં કુરુ મે પ્રભો ॥ ૩૫૨॥

॥ ઇતિ શ્રીગુરુગીતાયાં તૃતીયોઽધ્યાયઃ ॥

॥ ઇતિ શ્રીસ્કન્દપુરાણે ઉત્તરખણ્ડે ઈશ્વરપાર્વતી
સંવાદે ગુરુગીતા સમાપ્તા ॥

॥ શ્રીગુરુદત્તાત્રેયાર્પણમસ્તુ ॥

Shri Guru Gita - longer version (now out of print).

Encoded by Sunder Hattangadi
Proofread by Sunder Hattangadi, (Bhakta) Jan Mares (NE-BBT Czech)

---

*guru gItA - long version*
pdf was typeset on October 29, 2024

Please send corrections to *sanskrit@cheerful.com*